শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# ॥ শ্রীরঙ্গনাথপাদুকাসহস্রম্ ॥

## ॥ যন্ত্রিকাপদ্ধতিঃ ষডৱিংশী ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

# ॥ যন্ত্রিকাপদ্ধতিঃ ষডৱিংশী ॥

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

উদগ্রযন্ত্রিকাং ৱন্দে পাদুকাং যন্নিৱেশনাত্।
উপর্যপি পদং ৱিষ্ণোঃ প্রত্যাদিষ্টপ্রসাধনম্॥ ২৬-১ ॥

প্রসভং প্রতিরুধ্য কণ্টকাদীন্
ভৱতী শৌরিপদাম্বুজাদধস্তাত্।
চরণাৱনি! ধারযত্যমুষ্মিন্
উচিতচ্ছাযমুপর্যপি প্রতীকম্॥ ২৬-২ ॥

মুরভিন্মণিপাদুকে! ত্বদীযাং অনঘামঙ্গুলিযন্ত্রিকামৱৈমি।
স্ৱযমুন্নমিতাং প্রদেশিনীং তে পরমং দৈৱতমেকমিত্যৃচন্তীম্॥ ২৬-৩ ॥

স্ৱদতে মণিপাদুকে! ত্বদীযা পদশাখাযুগযন্ত্রিকা ৱিচিত্রা।
পরমং পুরুষং প্রকাশযন্তী প্রণৱস্যেৱ পরেযমর্ধমাত্রা॥ ২৬-৪ ॥

অনুযাতমনোরথা মুরারেঃ
ভৱতী কেলিরথশ্রিযং দধাতি।
চরণাৱনি! যন্ত্রিকা তৱৈষা
তনুতে কূবরসম্পদং পুরস্তাত্॥ ২৬-৫ ॥

শঙ্কে ভৱত্যাঃ সুভগং প্রতীকং রঙ্গেশপাদাঙ্গুলিসঙ্গ্রহার্থম্।
ত্রাণায পাদাৱনি! ৱিষ্টপানাং আজ্ঞাকরীমঙ্গুলিমুদ্রিকাং তে॥ ২৬-৬ ॥

অলঙ্কৃতং কর্ণিকযোপরিষ্টাদ্
উদগ্রনালং তৱ যন্ত্রিকাংশম্।
পদ্মাপতেঃ পাদসরোজলক্ষ্ম্যাঃ
প্রত্যেমি পাদাৱনি! কেলিপদ্মম্॥ ২৬-৭ ॥

উপরি ৱিনিহিতস্য কেশৱাঙ্ঘ্রেঃ
উপরি পদাৱনি! যন্ত্রিকাত্মিকা ত্বম্।

ইতি তৱ মহিমা লঘূকরোতি
প্রণতসুরেশ্বরশেখরাধিরোহম্॥ ২৬-৮ ॥

নিত্যং পদাৱনি! নিবদ্ধকিরীটশোভং
পদ্মালযাপরিচিতং পদমুদ্বহন্ত্যাঃ।
অঙ্গীকরোতি রুচিমঙ্গুলিযন্ত্রিকা তে
সাম্রাজ্যসংপদনুরূপমিৱাতপত্রম্॥ ২৬-৯ ॥

প্রথমা কলেৱ ভৱতী চরণাৱনি! ভাতি রঙ্গচন্দ্রমসঃ।
শৃঙ্গোন্নতিরিৱ যত্র শ্রিযং ৱিভাৱযতি যন্ত্রিকাযোগঃ॥ ২৬-১০ ॥

॥ ইতি শ্রীপাদুকাসহস্রে যন্ত্রিকাপদ্ধতিঃ ষডৱিংশী ॥

কৱিতার্কিকসিংহায কল্যাণগুণশালিনে।
শ্রীমতে ৱেঙ্কটেশায ৱেদান্তগুরৱে নমঃ॥